# सञ्चारिणी दीपशिखा

## दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

दीपशिखेयं सञ्चरति। द्वितीयः अयम् अङ्कः। बहवः अस्याः पत्रिकायाः द्वितीयाङ्कस्य विषये अपृच्छन्निति लेखकानां सम्पादकानां च सुमहान् आनन्दः। सद्यः अवसिता शारदीया दुर्गाराधना। समागतप्राया दीपावली। देशः, विश्वं च विविधाभिः घटनाभिः आन्दोलितप्रायम् अपि उत्सवप्रियाणां मनुजानाम् उत्सवमुखरतां न नाशयितुं शक्नोति। यतः आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। तस्मात् स्वयमानन्दिताः सन्त आनन्दमुपास्महे वयम्। अस्माकम् आनन्देन जीवने सीमावर्तिनां सैनिकानां महदवदानं संस्मरद्भिः अस्माभिः तेभ्यः सक्रियतया कार्तज्ञ्यविज्ञापनमपि कर्तव्यम्। तेषां तत्परिवारजनानां च जीवनं यथा आनन्दमयं स्यात् तथा अस्माभिरपि यतनीयम्।

अस्मिन् अङ्के बुद्धदेवस्य बौद्धदर्शनस्य परिचयात्मकलेखाः यथा तथैव कथानाटकादि अपि वर्तते इति महतो हर्षस्यास्पदम्। सर्वेऽपि लेखाः रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य योग्यैः छात्रैः प्रस्तुताः इति आनन्दस्य खेदस्य च विषयः। अन्येऽपि स्वीययोगदानेन पत्रिकामिमां पुष्णन्तु इति सम्प्रार्थयामः। आरम्भान्तयोः चित्रे अपि विभागस्य तृतीयवर्षीयच्छात्रेण शुभदीपपालेन विरचिते।

सर्वेभ्यः यथास्थानं शुभविजयायाः प्रणामान् स्नेहाञ्जलींश्च विनिवेदयामः। दीपावल्याः शुभकामनाश्च वितरामः। पाठकान् लेखकान् चित्रकारं च विशेषतः कार्तज्ञ्यवचःप्रसूनैः सभाजयामः।

विद्वज्जनविधेयः
राकेशदाशः
मुख्यसम्पादकः
दीपशिखायाः